शुद्धिकौमुदी

पाठः ८ – १०.०६.२०१७

स्त्रीप्रत्ययगताः दोषाः / सुबन्ताः

© All the content in these slides is the intellectual property of Vyoma Linguistic Labs Foundation.
Replication/reuse in any form without express written permission from the organisation is prohibited.

स्त्रीप्रत्ययान्तरूपाणां विषये केषाञ्चित् भ्रान्तिः अस्ति । प्रादेशिकभाषायाः प्रभावतः प्रायः एवं भवति । तादृशानि भ्रान्तियुक्तानि रूपाणि यथा –

अशुद्धम्	शुद्धम्
अध्यापकी	अध्यापिका
उपन्यासकी	उपन्यासिका
नायकी	नायिका
उद्घोषकी	उद्घोषिका
सेवकी	सेविका
अनुवादकी	अनुवादिका
विभूषकी	विभूषिका
उपाध्यायिनी	उपाध्याया/उपाध्यायी

सामान्यः

एतेषु कर्त्रर्थे 'ण्वुल्'प्रत्ययः अस्ति । 'प्रत्ययस्थात् कात्पूर्वस्यात इदाप्यसुपः' (पा.सू. ७.३.४४) इति सूत्रेण ककारस्य इकारः अपि परे । अतः, एते टाबन्ताः एव, न तु ङीबन्ताः । 'उपाध्यायी' इत्यत्र विकल्पेन ङीष् । ङीषः अभावे टाप् । या स्वयमेव अध्यापिका, सा उपाध्यायी, उपाध्याया वा । (ङीष्, टाप् वा) । या उपाध्यायस्य पत्नी भवति सा उपाध्यायानी (आनुक्), उपाध्यायी (ङीष्) वा ।

विशेषः

स्त्रीप्रत्ययप्रकरणे एव अन्यानि कानिचन रूपाणि दृश्यन्ते भ्रान्तिमूलकानि । तत्रापि प्रादेशिकभाषाप्रभावः एव कारणम् । तानि यथा –

अशुद्धम्	शुद्धम्
अध्यक्षिणी	अध्यक्षा
सिंहिणी	सिंही

इन्नन्ताः शब्दाः स्त्रियाम् ईकारं प्राप्नुवन्ति खलु ? (यथा – अधिकारिणी, उपकारिणी, न्यायवादिनी इत्यादयः) तेषां सादृश्यं मनसि निधाय 'अध्यक्षिणी' इत्यादीनि रूपाणि प्रयुज्यन्ते प्रायः ।

नर्तकी

अधोलिखितं वाक्यं पठत –

सा नर्तकी रमणीयतया नृत्यति ।

अत्र ’नर्तकी’ इति यत् प्रयुक्तं तत् साधु । ’नृती’धातोः ’शिल्पिनि ष्वुन्’ (पा.सू ३.१.१४५) इति सूत्रेण ष्वुन्-प्रत्यये नर्तकः इति रूपम् । तस्य स्त्रियां न ’टाप्’, अपि तु ङीष्, ’षिद्गौरादिभ्यश्च’ (पा.सू. ४.१.४१) इति सूत्रेण । अतः, ’नर्तकी’ इति रूपम् ।

एतदत्र स्मर्तव्यम् । शिल्पं नाम क्रियाकौशलम् । तद्वतः कर्तुं ष्वुन् स्यात् । तदभावे ? तदभावे तु कर्तरि ’ण्वुल्’ स्यात् एव । तदा अपि ’नर्तकः’ इति रूपम् । किन्तु, स्त्रियां षित्त्वाभावात् न ङीष्, अपि तु टाप् । ’प्रत्ययस्थात्....’ इति सूत्रेण अकारस्य इकारः । तदा च ’नर्तिका’ इति रूपम् । ’नर्तककौशलरहिता’ इत्यर्थः सिध्यति ।

तात्पर्यं तु - नर्तकी – नर्तनकौशलसहिता ।

- नर्तिका – नर्तनकौशलरहिता ।

सुन्दरा

सा लेखनी सुन्दरा अस्ति ।

इत्यस्मिन् वाक्ये यः 'सुन्दरा'शब्दः सः असाधुः । 'सुन्दरी' इत्येव साधु रूपम् । सुन्दरशब्दः गौरादिगणे पठितः । अतः 'षिद्गौरादिभ्यश्च' (पा.सू. ४.१.४१) इति सूत्रेण ङीष् ।

चेतनावतीषु 'सुन्दरी' इति प्रयोगः क्रियते विना चिन्ताम् । यथा – तरुणी सुन्दरी । किन्तु, अचेतनावत्सु आत्वं स्यादिति भ्रमः । अतः, 'सुन्दरा लेखनी', 'सुन्दरा लता' इत्यादयः प्रयोगाः क्रियन्ते । 'सुन्दर'शब्दः स्त्रियां सर्वत्र (चेतनेषु अचेतनेषु च) ईत्वम् एव प्राप्नोति, न कदाचिदपि आत्वम् ।

सुमङ्गली

सुमङ्गल्यः आशीर्भिः वधूम् अनुगृहीतवत्यः ।

अत्र ’सुमङ्गलाः’ इति स्यात् । सुमङ्गलाशब्दः छन्दसि संज्ञायां चैव ईत्वं (ङीप्) प्राप्नोति ’केवलमामक.....सुमङ्गलभेषजाच्च’ (पा.सू. ४.१.३०) इति सूत्रेण । तद्भिन्नस्थले, तन्नाम भाषायां, ’सुमङ्गला’ इत्येव रूपम् । ’सुमङ्गली’ इति रूपं वेदे एव । लोके च संज्ञायां गम्यमानायां भवति । बालिकायाः नाम ’सुमङ्गली’ इति भवितुम् अर्हति ।

आश्चर्यं नाम प्रादेशिकभाषासु अविधवायां ’सुमङ्गली’ इति ईकारान्तस्य प्रयोगः, नाम्नि ’सुमङ्गला’ इति आकारान्तस्य प्रयोगः च दृश्यते । विपरीतप्रयोगः अयम् ।

चोरा

चोरा सा आरक्षकैः गृहीता ।

अत्र 'चोरी' इति प्रयोक्तव्यम् । स्तेयार्थकात् चुरधातोः अचि (चुर + णिच् + अच्) चोरशब्दः सिद्ध्यति । ण्यन्तात् स्त्रियां ङीप् । अतः, 'चोरी' इति रूपम् । चोरार्थे चौरशब्दोऽपि अस्ति । चुरधातोः 'अ'प्रत्यये 'चुरा' इति रूपम् । चुरा शीलम् अस्य इति चौरः । (चुरा + णः – छत्रादिभ्यो णः – पा.सू. ४.४.६२) तस्यापि ण्यन्तात् (स्त्रियां ङीप्) अतः 'चौरी' इति रूपम् ।

सनातनादयः

अशुद्धम्	शुद्धम्
सनातना	सनातनी
पुरातना	पुरातनी
आधुनिका	आधुनिकी
इदानीन्तना	इदानीन्तनी
वार्षिका	वार्षिकी
षाण्मासिका	षाण्मासिकी
साधारणा	साधारणी
प्राचीनी	प्राचीना
नवीनी	नवीना/नूतना
अधस्तना	अधस्तनी

सनातनादयः

एते सर्वे कालसबद्धाः शब्दाः । टित्प्रत्ययानां ठगादीनां वा कारणतः एते स्त्रीलिङ्गे ईकारम् एव अर्हन्ति, न तु आकारम् । प्राचीननवीननूतनाः न तथा । प्राचीननवीनौ 'ख'प्रत्ययान्तौ । नूतनः 'तनप्-प्रत्ययान्तः । टित्वाद्यभावात् एतेषु ईकारः न, अपि तु आकारः । अन्येषां तु ईकारः ।

अतः, 'सनातना परम्परा', 'पुरातना भाषा' इत्यादयः प्रयोगाः असाधवः एव ।

vyoma ॥ वाचं धेनुमुपासीत ॥
Saṃskṛtam · Value Education · Technology

प्रार्थनाप्रभृतयः

प्रार्थना/प्रार्थनम्, उद्घाटना/उद्घाटनम्, गणना/गणनम्.. इत्येवं रूपद्वयं श्रूयते । प्रार्थनादिषु रूपद्वयं दृष्ट्वा केचन भ्रान्त्या 'पठना/लेखना' इत्यादीनि रूपाणि अपि भवन्ति इति चिन्तयन्ति ।

वस्तुस्थितिस्तु इत्थम् –

पठनम्, लेखनम्,गणनम्, उद्घाटनम् इत्यादिषु भावे ल्युट्-प्रत्ययः । एषः सर्वेभ्यः धातुभ्यः विधीयते । सर्वे धातवः भावार्थे ल्युडन्तरूपम् अर्हन्ति । एतेषां नपुंसकत्वम् एव ।

'प्रार्थना' इत्यादिषु 'युच्'प्रत्ययः । ('ण्यासश्रन्थओ युच्' – पा.सू. ३.३.१०७) सर्वे णिजन्ताः, परिगणिताः केचन शब्दाश्च स्त्रियां युचम् अर्हन्ति । अतः, प्रार्थनागणनादीनि रूपाणि सिद्ध्यन्ति । ये णिजन्ताः न, परिगणितेषु शब्देषु अन्तर्भावः अपि येषां नास्ति, ते स्त्रियां युचं न अर्हन्ति । अतः, तादृशधातूनां भावार्थे ल्युडन्तत्वात् आकारान्तं रूपं न भवति, अपि तु नपुंसकरूपम् एव । अतः, पठना लेखना इत्यादीनि रूपाणि असाधूनि एव ।

ये णिजन्ताः न, परिगणितेषु अपि न अन्तर्भवन्ति ते आकारान्तं रूपं न अर्हन्ति इति तात्पर्यम् । अन्वेषणा वन्दना इत्यादीनि परिगणनाकारणतः सिद्धानि ।

भयङ्करीप्रभृतयः

अधोनिर्दिष्टानि वाक्यानि परिशीलयत -

१) तस्याः राक्षस्याः आकृतिः भयङ्करी आसीत् ।

२) एषा मम सहोदरी ।

३) काचित् युवती अद्य मिलिता ।

४) एषा स्वाभाविका प्रक्रिया ।

५) संस्कृतभाषा परमपावना अस्ति ।

६) 'संस्कृतसेवा करणीया' इति मम जीवनाभिलाषा ।

एतेषु वाक्येषु यानि स्त्रीप्रत्ययान्तानि रूपाणि प्रयुक्तानि तेषां विषये ज्ञातव्यं किञ्चिदस्ति ।

भयङ्करीप्रभृतयः

१. भयङ्करी इति असाधुः । 'भयङ्करा' इत्येव । 'मेधार्तिभयेषु कृञः' (पा.सू. ३.२.४३) इति सूत्रेण अत्र खच्प्रत्ययः । अतः स्त्रियां टाप् एव, न ङीबादयः । तस्मात्, 'भयङ्करा' इति आकारान्तं रूपम् एव साधु ।

२. 'सहोदरा' इति आकारान्तरूपम् एव शुद्धम् । सह समानम् उदारम् अस्य इति सहोदरः । सभावे तु सोदरः इति । 'सहनञ्विद्यमानपूर्वाच्च' (पा.सू. ४.१.५७) इति सूत्रेण ङीषः निषेधः । अतः टाप् एव । तस्मात् 'सहोदरा' इति आकारान्तम् एव शुद्धम् । ईकारान्तस्य न साधुता । लोके क्वचित् सहोदरी इति रूपं प्रयुक्तं दृश्यते । यदि शिष्टाः प्रयोगः दृश्यन्ते तर्हि गौरादिगणादिषु पाठः अङ्गीकरणीयः भवेत् ।

३. यूनस्तिः (पा.सू. ४.१.७७) इति सूत्रेण तिप्रत्यये युवतिः इति सिद्धम् । केचन, युवती इति ईकारान्तं रूपं न अङ्गीकुर्वन्ति । सिद्धान्तकमुद्यां तु 'यौतेः शत्रन्तात् ङीषो बोध्यम्' इति वचनेन युवती इति रूपं समर्थितम् एव । व्याख्याकाराः तत्साधनाय अन्यान् अपि मार्गान् दर्शितवन्तः दृश्यन्ते । अतः, 'युवती' इति रूपम् अपि साधु एव ।

भयङ्करीप्रभृतयः

४. 'स्वाभाविकी' इति ईकारान्तं रूपम् एव साधु । स्वभावात् आगतः इत्यर्थे ठक्प्रत्ययः । तेन स्त्रियां ङीष् ।

५. पावनशब्दः करणल्युडन्तः । तेन टित्त्वात् ङीप्-प्रत्यये 'पावनी' इति रूपं स्यात् । अतः, पावना इति आकारान्तं रूपम् असाधु ।

६. 'अभिलाषा' इति आकारान्तं रूपम् असाधु । 'अभिलाष'शब्दः घञन्तः । 'घञबन्ताः पुंसि' इति लिङ्गानुशासनेन घञन्तस्य पुंस्त्वं विहितम् । अतः, 'अभिलाषः' इति पुंल्लिङ्गविशिष्टं रूपम् एव साधु ।

बहवः

बहवः महिलाः शास्त्राध्ययने उत्सुकाः दृश्यन्ते ।

'बहवः' इति न दोषाय । बहुशब्दः पुंसि बहुवचने बहवः इति रूपम् । स्त्रियाम् अपि 'बहवः' इति रूपम् अस्ति । पुंल्लिङ्गस्त्रीलिङ्गयोः रूपभेदः द्वितीयाबहुवचनान्तादारभ्य ज्ञायते । तावत्-पर्यन्तं समानं रूपम् । द्वितीयाबहुवचनान्ते पुंसि 'बहून्' इति रूपम् । स्त्रियां 'बहूः' इति । एवमग्रेऽपि ।

बहुशब्दात् स्त्रियां विकल्पेन ङीष् विधीयते 'बह्वादिभ्यश्च' (पा.सू. ४.१.४५) इति सूत्रेण । ङीषि 'बह्वी' इति रूपम् । तदभावे 'बहुः' इति रूपम् ।

केचन 'बहुशब्दस्य स्त्रियां 'बह्वी' इत्येव रूपम्' इति भावयन्ति । अतः, 'बहवः' इति रूपं पुंसि एव इति तेषां भ्रान्तिः । ङीष् विकल्पेन इति ते विस्मरन्ति ।

एवमेव –

मृदुः – मृद्वी
लघुः - लघ्वी
गुरुः – गुर्वी
पटुः – पट्वी इत्यादयः अपि ।

बहवः

हलन्ताः अपि केचन शब्दाः आकारान्ततां प्राप्नुवन्ति कदाचित् । यथा –

वाक् – वाचा

दिक् – दिशा

निट् – निशा

प्रतिपत् – प्रतिपदा

सम्पत् – सम्पदा

अत्र प्रमाणं तु –

वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः ।
आपं चैव हलन्तानां यथा वाचा निशा दिशा ॥
(वष्टि = इच्छति)

शूर्पणखीप्रभृतयः

अधोनिर्दिष्टानि वाक्यानि परिशीलयत –

१) राक्षसी शूर्पणखी रामसमीपम् आगता ।
२) अरण्ये काचित् पिशाचा वसति स्म ।
३) चित्रस्था आकृतिः नैजा इति भाति ।

शूर्पणखा इत्येव साधुः । 'नखमुखात् संज्ञायाम्' (पा.सू. ४.१.५८) इति ङीषः निषेधात् ईकारस्य प्रसक्तिः नास्ति अत्र । पिशाचः 'अण्'प्रत्ययान्तः । अतः, स्त्रियां ङीष् । तस्मात्, 'पिशाची' इत्येव रूपम् । निजशब्दात् स्वार्थे अणि नैजम् इति रूपम् । एवं तस्य अणणन्तत्वात् स्त्रियां 'टिड्ढाणञ्...' इति सूत्रेण ङीप् । अतः, 'नैजी' इति रूपम् ।

४) प्रतिदशवर्षं देशे जनगणतिः प्रचलति ।

'जनगणतिः' इति अपशब्दः । 'जनगणना' इति प्रयोक्तव्यम् । गणधातुः दशमगणीयः । अतः, तस्य स्वार्थे णिच् । णिजन्तात् 'क्तिन्' न भवति, प्रत्युत 'युच्' भवति - 'ण्यासश्रन्थो युच्' (पा.सू. ३.३.१०७) इति सूत्रेण । युचि (यकारस्य अनादेशः) 'गणना' इति रूपम् ।

'गणतिः' इति रूपं तदा स्यात्, यदा च णिज्रहितं रूपम् अपि प्राप्नुवन्ति । ('आधृषाद्वा' इति गणसूत्रम्) किन्तु, गणधातुः न आधृषीयः । 'सर्वे चुरादयः विकल्पेन णिचं लभन्ते' इति कश्चन पक्षः अस्ति । किन्तु, तं वादं सर्वे न अङ्गीकुर्वन्ति । 'गणति'शब्दं कोषकाराः अपि दर्शितवन्तः न दृश्यन्ते । अतः, 'गणना' इत्येव रूपं भावार्थे ।

सुबन्ताः

१) जीवने तत्त्वस्य प्राधान्यता स्यात् ।

’प्राधान्यता’ इति अपशब्दः । ’प्राधान्यम्’ इति, ’प्रधानता’ इति, ’प्रधानत्वम्’ इति वा प्रयोक्तव्यम् । ’प्राधान्यम्’ इति भावार्थे ’ष्यञ्’ । ’प्रधानत्वम्’ इत्यत्र ’त्व’प्रत्ययः भावार्थे । ’प्रधानता’ इत्यत्र ’तल्’ भावार्थे । एवं भावार्थे त्रयः प्रत्ययाः । एकस्मिन्नेव अर्थे प्रत्ययद्वयस्य प्रसक्तिः नास्ति । किन्तु, लोके प्रमादवशात् भावार्थकस्य प्रत्ययद्वयस्य योजनं कृतं दृश्यते । एतत् अनुचितम् । प्राधान्यता’सदृशानि अन्यानि कानिचन पदानि यथा –

अशुद्धानि	**शुद्धानि**
वैशिष्ट्यता	वैशिष्ट्यम्
ऐक्यता	ऐक्यम्
दार्ढ्यता	दार्ढ्यम्
मौर्ख्यता	मौर्ख्यम्

सुबन्ताः

अशुद्धानि	शुद्धानि
काठिन्यता	काठिन्यम्
शौर्यता	शौर्यम्
वैरस्यता	वैरस्यम्
नैपुण्यता	नैपुण्यम्
प्रामुख्यता	प्रामुख्यम्
वैविध्यता	वैविध्यम्
साफल्यता	साफल्यम्
प्रावीण्यता	प्रावीण्यम्
नावीन्यता	नावीन्यम्
प्रामाण्यता	प्रामाण्यम्

वैशिष्ट्यादीनि यथा तथैव 'विशिष्टता', 'विशिष्टत्वम्' इत्यादीनि रूपाणि अपि साधूनि एव ।

सुबन्ताः

२. सः अत्रतः तत्र गतवान्, तत्रतः अन्यत्र गतवान् ।

'अत्रतः', 'तत्रतः' इत्येतत् उभयम् अपि अशुद्धम् । 'इतः','ततः' इति प्रत्योक्तव्यम् । तस्मिन् इति सप्तम्यन्तात् स्वार्थे (सप्तम्यर्थे) त्रल्प्रत्यये कृते (सप्तम्यास्त्रल् - पा.सू. ५.३.१०) 'तत्र' इति रूपं सिध्यति । एवं च 'तत्र' इत्यस्य प्रकृतिः 'तत्'शब्दः । 'तसिल्'प्रत्ययस्य प्रकृतिः अपि 'तत्'शब्दः एव । (पञ्चम्यास्तसिल् - पा.सू. ५.३.७) त्रल्प्रत्ययान्तात् सप्तम्यर्थकात् 'तत्र' इत्येतस्मात् तसिल् न विहितः, अपि तु पञ्चम्यन्तात् तच्छब्दात् विहितः । अतः, 'तत्रतः' इति असाधु । एवम् एव सप्तम्यन्तात् एतच्छब्दात् त्रलि 'अत्र' इति रूपम् । तसिलि तु इदमः 'इतः' इति । अत्रापि तसिल् त्रलन्तात् सप्तम्यर्थकात् 'अत्र' इत्येतस्मात् न भवति ।

सुबन्ताः

३. बालकः उपरितः पतितः ।

'उपरितः' इति अपशब्दः । 'उपरि' इति, 'उपरिष्टात्' इति प्रयोक्तव्यम् । ऊर्ध्वशब्दात् सप्तमीपञ्चमीप्रथमार्थेषु उपादेशाः रिल्-रिष्टातिलौ च 'उपर्युपरिष्टात्' (पा.सू. ५.३.३१) इति सूत्रेण । तस्मात्,'उपरि','उपरिष्टात्' इति शब्दौ पञ्चम्यर्थकौ अपि । अतः, 'उपरि' इति प्रयुक्ते एव 'ऊर्ध्वभागतः' इत्यर्थः सिध्यति । पुनः, तसिलः प्रयोगः न आवश्यकः । अन्यच्च, 'उपरि'शब्दात् तसिल् न विहितः अपि । 'बालकः उपरि पतितः' इति प्रयोगः कृतः चेत्, 'ऊर्ध्वभागात्' इत्यर्थः सिध्यति एव । स्पष्टप्रतीतिः नास्ति इति यदि चिन्त्यते तर्हि 'उपरिष्टात्' इति प्रयुज्यताम् । 'ऊर्ध्वभागात्' इति वा प्रयुज्यताम् ।

उपरिष्टात् इत्यस्य पञ्चम्यर्थकत्वम् इति, 'उपरि' इत्यस्य सप्तम्यर्थमात्रकत्वम् इति वा भ्रान्तिः मास्तु । उभयोः अपि सप्तमीपञ्चमीप्रथमार्थाः सन्ति एव ।

सुबन्ताः

४. विद्यालयतः इत्यत्र तसिल्-प्रत्ययः ।

’विद्यालयतः’ इति रूपं तु साधु । किन्तु, अत्र ’तसिल्’ इति कथनम् असाधु । वस्तुतः अत्र तस्-प्रत्ययः । तसिल् सर्वनामशब्दमात्रात् विहितः, न तु सर्वस्मात् । अतः, विद्यालयतः इत्यत्र तसिल् न भवति । ’तस्’तु भवति । ’आद्यादिभ्यः उपसङ्ख्यानम्’ इति वार्तिकेन (’प्रतियोगे पञ्चम्यास्तसिः’ - पा.सू. ५.४.४४ इति सूत्रे) तस् । एषः एव ’सार्वविभक्तिकः तसिः’ इत्यपि उच्यते ।

५. तत् बहिस्तात् अन्तः आनय ।

’बहिस्तात्’ इति अपशब्दः । ’बहिर्भागतः’ इति, ’बहिः’ इत्येव वा वक्तव्यम् । अस्तातिप्रत्ययः बहिश्शब्दात् न विहितः । अतः, बहिस्तात् इत्यत्र अस्तातिः अस्थाने ।

सुबन्ताः

६. पाश्चिमात्याः अपि संस्कृताध्ययने आसक्ताः दृश्यन्ते ।

'पाश्चिमात्याः' इति अपशब्दः । 'पाश्चात्त्याः' इति वक्तव्यम् । 'दक्षिणापश्चात्पुरसस्त्यक्' (पा.सू.४.२.९८) इति सूत्रेण पश्चाच्छब्दात् त्यल्-प्रत्यये कृते 'पाश्चात्त्यः' इत्यस्य सिद्धिः । त्यक्-प्रत्ययः पश्चाच्छब्दात् विहितः, न तु पश्चिमशब्दात् । अतः, 'पाश्चिमात्यः' इति रूपं न भवति । 'पाश्चात्त्यः' इत्यत्र तकारद्वयं लेखनीयम् इति स्मर्तव्यम् । (पश्चाच्छब्दगतः एकः तकारः, त्यक्-प्रत्ययगतः अपरः । आहत्य तकारद्वयम्)

vyoma ॥ वाचं धेनुमुपासीत ॥ Saṃskṛtam · Value Education · Technology

QUESTIONS/DOUBTS?

Email us @

sanskritfromhome@vyomalabs.in

For downloading course-materials, login @
www.sanskritfromhome.in

Subscribe to our youtube channel @
vyoma-samskrta-pathasala

Buy our Samskrita-learning products @
www.digitalsanskritguru.com

Support our cause for Samskrita-Samskriti @
www.vyomalabs.in

vyoma
॥ वाचं धेनुमुपासीत ॥
Saṃskṛtam · Value Education · Technology

© All the content in this presentation is the intellectual property of Vyoma Linguistic Labs Foundation.

All materials shared in our website are purely for the purpose of personal study.

Replication/reuse in any form without written permission from the organisation is prohibited.